International Journal of Sanskrit Research 2022; 8(1): 279-280

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(1): 279-280
© 2022 IJSR
www.anantaajournal.com
Received: 14-11-2021
Accepted: 03-01-2022

**प्रियंका**
शोधच्छात्रा साहित्यविभागः
केन्द्रियसंस्कृतविश्वविद्यालयः
गुरुवायूर्-परिसरः, पुरनाट्टुकरा, तृश्शुर,
केरलम्, भारत

# भवनाटके काव्ये उपमासौन्दर्यम्

## प्रियंका

**DOI:** https://doi.org/10.22271/23947519.2022.v8.i1e.1652

**भूमिका –**
श्री पूर्णचैतन्यब्रह्मचारीणा विरचितं “भवनाटकं काव्यम्” अतिरमणीयं शास्त्रकाव्यरूपं खण्डकाव्यमस्ति । एषः कविः केरलीयोऽस्ति । अस्मिन् खण्डकाव्ये चत्वार अङ्काः सन्ति । प्रत्यङ्कं नैकाः रङ्गाः सन्ति । अत्र यतिना क्रमशः प्रत्यङ्कं ब्रह्मचर्याश्रमः, गृहस्थाश्रमः, वानप्रस्थाश्रमः, संन्यासाश्रमश्च प्रतिपादिताः । काव्येऽस्मिन् केरलीयाचारविचारः वर्णितः । शास्त्रोदिचवर्णाश्रमाचारधर्मेण यज्ञेन, दानेन, तपसा, साधनचतुष्टयेन, पुरुषार्थचतुष्टयेन, गुरूपदिष्टमहावाक्यार्थश्रवणात् स्वरुपबोधेन श्रुत्यनुसारं ब्रह्मरुपनिरुपितम् इदं खण्डकाव्यं विद्यते । अस्य वैशिष्ट्यम् एवं रुपेण वक्तुं शक्यते –

नेत्रे कवित्वपाण्डित्यमये दधदत्वार्मणे ।
योऽक्लेशादखिलं वर्त्म सारस्वतमवैक्षत ॥
चरतः पथि शास्त्राणां यस्यासच्चर्मचक्षुषः ।
देव्याः करावलंबेन न जातु स्खलिता मतिः ॥
यांस्तर्ककर्कशानर्थान् सूक्तिष्वाद्रियते कविः ।
सूर्याशिव इवेन्दौ ते कांचिदर्चंति कांतताम् ॥ [1]

यथा संस्कृतसाहित्ये कविकुलगुरोः महाकविकालिदासस्य काव्यकौशलं उपमायां वर्तते । तथापि श्रूयते –

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥ [2]

तथैव अस्य मुनीन्द्रस्यापि रुचि उपमायां वर्तते । प्रायः सर्वेषु अङ्केषु उपमायाः प्रयोगेण विभूषितम् इदं काव्यम् ॥

**अलङ्कारः –**
अलङ्कारस्य विषये विश्वनाथकविराजेन साहित्यदर्पणे एवं प्रकारेणोक्तम् –

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥ [3]

काव्यरूपपुरुषस्य शरीरे अलङ्काराः कटककुण्डलादिवत् शोभातिशायिनः भवन्ति । शब्दार्थालंकारयो अर्थालङ्काराणां विशेषमहत्त्वं विद्यते । यत्र परिवृत्तिसहाः शब्दाः तत्र अर्थालङ्काराः । अर्थालङ्कारेषु उपमालङ्कारः प्रधान अस्ति । यथा कुवलयानन्दे अप्पयदीक्षितस्यानुसारम् –

अलङ्कार शिरोरत्नं सर्वस्वं काव्यसम्पदाम्
उपमा कविवंशस्य मातैवेति मतिर्मम् ।

**Corresponding Author:**
**प्रियंका**
शोधच्छात्रा साहित्यविभागः
केन्द्रियसंस्कृतविश्वविद्यालयः
गुरुवायूर्-परिसरः, पुरनाट्टुकरा, तृश्शुर,
केरलम्, भारत

---
[1] भवनाटकं काव्यम् पृ.सं.7 ।
[2] संस्कृत-साहित्येतिहासः,पृ.सं. 90 ।
[3] साहित्यदर्पणः,दशमो परिच्छेदः ।

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिताभेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥ [4]

संस्कृतसाहित्यस्य नक्षत्रमण्डले लक्षणग्रन्थेषु उपमालङ्कारस्य लक्षणं काव्याचार्येण एवं प्रतिपादितम् । यथा – चन्द्रालोके अत्यधिकं मनोहरं लक्षणं रचितम् आचार्यः जयदेवेन –

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।
हृदये खेलतोरुच्चस्तन्वङ्गीस्तयोरिव ॥ [5]

**भवनाटके उपमा –**

गुरुवदनसरोजान्निःसरन्तीं सुवाचं हृदयमलशेषं क्षालयन्तीं पवित्राम्।
अमरधुनिमुमेशस्योत्तमाङ्गाद्वलन्तीं सगरज इव गृह्णत्यादरेणार्भकोऽसौ ॥ [6]

इदं पद्यं भवनाटकस्य प्रथमाङ्कस्य वर्तते । अत्र गुरो उपदेशः बालकस्य कृते गङ्गासदृशः निर्मलो भवति इति उपमया प्रदर्शितम् । अत्र पूर्णोपमालंकारः विद्यते । पद्ये अस्मिन् अर्भक उपमेयः, सगरज उपमानम्, इव इति उपमावाचकशब्दः, गृह्णाति साधारणधर्मोऽस्ति ।

कंकणमिव मणिबन्धे करयो रेखात्रयं तु यस्याः स्यात्।
मणिगणवलयविभूषा योषा सा श्रीरिव क्षितौ विचरेत् ॥ [7]

अत्र नारीणां स्वरुपं उपमया दर्शितम् । योषा उपमेयः, उपमानं श्रीः, इव उपमावाचकशब्दः, विचरण साधारणधर्मः विद्यते ।

त्वं मे मित्रमसि प्रपञ्चजलधौ कामादिदुग्राहकै-
र्व्याप्ते प्राक्तनवासनानिलनुदत्कल्लोलमालाकुले ।
दुष्पारेऽत्र तरीरिव प्रभवतादित्यर्थयन् दक्षिणं
पाणिं दक्षिणपाणिना वहति तद्वध्वा वरः सादरम् ॥ [8]

इदं पद्यं भवनाटकस्य द्वितीयाङ्कस्य वर्तते । विवाहप्रस्तावपद्ये भर्ता पत्नीं वदति । अत्र परम्परितोपमा विद्यते । यतो हि प्रपञ्चः जलधिरिव इति वाचकलुप्तोपमायां दक्षिणपाणेः तरीत्वेन उपमा प्रतिपादनम् कारणमिति ।

निष्कुटे कलितयष्टिपट्टिकाकन्दुकप्रभृतिबालकेलिभिः ।
राजहंस इव मानसं मम तोषयेद्धिमगिरेः कदात्मजः ॥ [9]

अत्र बालक्रीडायाः वर्णनमस्ति । मानसं उपमेयः, राजहंस उपमानम्, इव उपमावाचकशब्दः, क्रीडा साधारणधर्मः ।

क्व त्वं यियाससि विहाय पदानुगां मां छायामिवापदि च संपदि धर्मतस्ते ।
स्त्रीपुंसयोः सहगतिर्विहिता विधात्रा देहात्मनोरिव सदेति वदन्ति विज्ञाः ॥ [10]

तृतीयाङ्कस्य प्रथमे रङ्गे एतत् पद्यं विद्यते । अत्र स्त्रीपुंसौ उपमेयं, देहात्मानौ उपमानं, सहगतित्वं साधारणधर्मः, इव उपमावाचकः । अर्थात् प्राणिनः देहात्मनोः आ मृत्योः सहगतिरस्ति एवं दम्पत्त्योरपि ।

इत्याद्यनेकवचनैरपि योग्यशिष्टाचारैश्च बान्धवकुलं परितोषयन् सः ।
पत्न्या सहालिरिव पीतमधुप्रसूनात्तूर्णी गतस्पृह उदञ्चाति गेहतोऽङ्घ्रिम् ॥ [11]

वानप्रस्थं जिगिमिषुः पुरुषः कथं स्वगृहात् गच्छतीति उपमया प्रतिपादयति कविः । यथा कश्चन भ्रमरः प्रथमं मधुः पायं पायं प्रसूनात् अन्यत्र गच्छति तथा अयं पुरुषः स्वकीयात् गृहात् गच्छति । अत्र अलि उपमानं, पुरुष उपमेयं, गतस्पृहत्वं साधारणधर्मः, इव उपमावाचकशब्दः । अत्र इदम् अपि वैशिष्ट्यं प्रसूनगेहयोरपि उपमोपमेयभावो प्रतीयते ।

वयस्यानां क्रीडासु च निरपराधोऽपि कितवैरपीपीडिष्यन्यैर्बलिभिरसहायः प्रतिदिनम् ।
प्रतीकाराशक्तः कपिरिव भृशं जालिकधृतश्चपेटाभिर्मुष्टिप्रहरणमृषोक्तिप्रभृतिभिः ॥ [12]

चतुर्थाङ्कस्य पद्यम् इदम् । पुरुषः स्वीयां बालक्रीडां स्मरति । तदानीम् उपमालङ्कारः एवं प्रवृत्तः । तथाहि क्रीडायाम् असहायः बालकः वयसिः पीडितो भवति । यथा जालिकाधृतः कपि उपमानः, अत्र क्रीडन् बालक उपमेयः, पीडितत्त्वादिः साधारणधर्मः, इव उपमावाचकः ।

यतः सत्यं ब्रह्मेत्यभिदधति वेदा अपि तथाऽपवर्गोऽप्यस्यैवाभ्यसनत इहाप्येत सततम् ।
अतः सत्यस्यैवाचरणमिति मोक्षस्य नितरामुपायं मन्यन्ते रुज इव भवाद्दिव्यमगदम् ॥ [13]

अत्र सत्यस्य परम्परया मोक्षोपायात्त्वं वर्णितम् । मोक्ष उपमेयः, रुक् उपमाना, इव उपमावाचकः, उपायत्व साधारणधर्मः ॥

**उपसंहारः –**

प्रायेण प्रत्यङ्कं भवनाटके उपमालङ्कारः कविना समावेशितः । शोधपत्रस्य गौरवभयात् अत्र अधिकोदाहरणानि न लिखितानि । अत उपमा प्रियो भवति असौ कविः । अस्य निबन्धस्य माध्यमेन भवनाटककाव्यस्य अलङ्कार दृष्ट्या महत्त्वं अनायासेन प्रतिपादितम् भवति ।

**सन्दर्भग्रन्थसूची –**

1. पूज्यब्रह्मचारिपूर्णचैतन्यप्रणीतं, भवनाटकं काव्यम्, १९७६, भगवानलाल तेजाजी खारावाला तेषां सूनवश्च लालजीभाई।
2. आचार्य हंसराजः अग्रवालः, संस्कृत-साहित्येतिहासः, २००९, वाराणसी, चौखम्बा सुरभारती प्रकाशन ।
3. डॉ. सत्यव्रत सिंह, साहित्यदर्पणः, २०१०, वाराणसी, चौखम्बा विद्याभवन ।
4. डॉ. निरञ्जन मिश्रः, कुवलयानन्दः, २००१, जयपुर, हंसा प्रकाशन ।
5. डॉ. श्रीकृष्णमणि त्रिपाठी, चन्द्रालोकः, २०१२, वाराणसी, चौखम्बा सुरभारती प्रकाशन ।

[4] कुवलयानन्दः, पृ.सं.6-7 ।
[5] चन्द्रालोकः,पञ्चमो मयूखः 11 ।
[6] भवनाटकं काव्यम्, 1.6.15 ।
[7] भवनाटकं काव्यम्, 1.8.14 ।
[8] भवनाटकं काव्यम्, 2.6.36 ।
[9] भवनाटकं काव्यम्, 2.9.30 ।
[10] भनवाटकं काव्यम्, 3.1.11 ।
[11] भवनाटकं काव्यम्, 3.2.9 ।
[12] भवनाटकं काव्यम्, 4.1.26 ।
[13] भवनाटकं काव्यम्, 4.7.4 ।